'पृणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति देवः।

पारकः-रिका, पारकः-रिका, [1]पुपूर्षकः-र्षिका, [2]पेप्रीयकः-यिका;
पर्ता-पर्त्री, पारयिता-त्री, पुपूर्षिता-त्री, पेप्रीयिता-त्री;
[3]पिप्रत्-पिप्रतौ-पिप्रतः, पिप्रती, पारयन्-न्ती, पुपूर्षन्-न्ती; —
[4]परिष्यन्-न्ती-ती, पारयिष्यन्-न्ती-ती, पुपूर्षिष्यन्-न्ती-ती; —
व्यतिपिप्राणः, पारयमाणः, व्यतिपुपूर्षमाणः, पेप्रीयमाणः;
व्यतिपरिष्यमाणः, पारयिष्यमाणः, व्यतिपुपूर्षिष्यमाणः, पेप्रीयिष्यमाणः;
व्यापृत्-व्यापृतौ-व्यापृतः; — — —
व्यापृतम्-तः-तवान्, पारितः, पुपूर्षितः, पेप्रीयितः-तवान्;
परः, व्यापारी, पारः, पुपूर्षुः, [5]पिपारयिषुः, पेप्रियः;

---

तु दीर्घान्त एवेष्टः। यदाह—'शृदृप्रां ह्रस्वो वा' (7-4-12) इत्यत्र "केचित् एतत् सूत्रं प्रत्याचक्षते। 'श्रा पाके, द्रा कुत्सायां गतौ, प्रा पूरणे' इत्येषाम्, 'बह्वर्था अपि धातवः' (भाष्यम् 1-3-1) इति शृदृप्राम् अर्थे वर्तमानानां 'विशश्रतुः' इत्यादीनि रूपाणि साधयन्ति। तथा सति, 'विशुश्रुवान्' इति क्वसौ एतद्रूपं न स्यात्।" इति। यदि ह्रस्वान्तः स्यात् प्रातिना प्रत्याख्यानम्, 'पिपृवान्' इति प्रयोजनकथनं चानुपपन्नं स्यात्। तथा वृत्ति-न्यास-पदमञ्जरी-प्रदीपकादयोऽपि। किञ्च, अपाणिनीयश्च ह्रस्वान्तः। यदि हि स्यात्; किं ह्रस्वविकल्पेन? यत् क्रैयादिकाद् दीर्घान्तरूपाणि, अस्माच्च ह्रस्वान्तरूपाणि भविष्यन्ति। एवञ्च, "तं पिपृतं रोदसी—" (तै. ब्रा. 2. 8. 4. 8.) 'पाहि माऽग्ने पिपृहि—' (तै. सं. 1.3.3.1.) इत्यादयश्छान्दसा द्रष्टव्याः॥" इति मा. धा. वृत्तौ सुदूरं विचार्य ह्रस्वान्तपाठाभावः समर्थितः। तथापि, सिद्धान्तकौमुद्यादिषु, पूर्वेषां ग्रन्थेषु ह्रस्वान्तस्याप्युपलम्भात्तेषां मतानुरोधेनात्र ह्रस्वान्तस्य रूपाणि प्रदर्शितानि।

1. सन्नन्ते सर्वत्र, 'अज्झनगमां सनि, (6-4-16) इति दीर्घे, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे 'उद् ओष्ठ्यपूर्वस्य' (7-1-102) इत्युत्त्वे रपरत्वे 'हलि च' (8-2-77) इति दीर्घः। 'इट् सनि वा' (7-2-41) इत्यत्रोपदेशाधिकारादत्र सनि इड्विधिर्न।
2. यङन्ते सर्वत्र 'रीङ् ऋतः' (7-4-27) इति रीङागमः। अभ्यासे गुणः।
3. शतरि, 'जुहोत्यादिभ्यः—' (2-4-75) इति श्लुः विकरणप्रत्ययः। 'श्लौ' (6-1-10) इति द्विर्वचनम्। 'अर्तिपिपर्त्योश्च' (7-4-77) इति अभ्यासस्येत्वम्। 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः।
4. 'ऋद्धनोः स्ये' (7-2-70) इति स्यप्रत्ययस्येडागमः।
5. ण्यन्तात् सनि, 'ओः पुयण्ज्यपरे' (7-4-80) इत्यभ्यासस्येकारः।